# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१९)

## १४.११.२०११

# पुनरावर्तनम्

- युष्मद्  स्
- युष्मद्  अम्  ('ङेप्रथमयोरम्')
- त्व अद् अम्  ('त्वाहौ सौ')
- त्वद्      अम्  ('अतो गुणे')
- त्व्      अम्   ('शेषे लोपः')
- त्वम्

- परमत्वम् । परमाहम् । अतित्वम् । अत्यहम् ।
- 'ङेप्रथमयोरम्' इत्यादीनाम् आङ्गत्वात् तदन्तविधिः ।
- 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' (प) ।
- गौणत्वेऽपि एतानि सूत्राणि प्रवर्तन्ते । अप्रवृत्तौ मानाभावात् ।

# ३८६. युवावौ द्विवचने (७.२.९२)

- पदद्वयम् । युव-आवौ, द्विवचने ।
- ‘अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘विभक्तौ’ इति, ‘युष्मदस्मदोरनादेशे’ (७.२.८६) इत्यतः ‘युष्मदस्मदोः’ इति च अनुवर्तते, ‘मपर्यन्तस्य’ (७.२.९१) इति अधिक्रियते ।
- द्वयोरुक्तौ युष्मदस्मदोः मपर्यन्तस्य युवावौ स्तः विभक्तौ ।

# ३८७. प्रथमायाश्च द्विवचने भाषायाम् (७.२.८८)

- चत्वारि पदानि । प्रथमायाः, च, द्विवचने, भाषायाम् ।
- 'अष्टन आ विभक्तौ' (७.२.८४) इत्यतः 'आ विभक्तौ' इति, 'युष्मदस्मदोरनादेशे' (७.२.८६) इत्यतः 'युष्मदस्मदोः' इति च अनुवर्तते ।
- इह युष्मदस्मदोः आकारः अन्तादेशः स्यात् ।

- युष्मद् औ — अस्मद् औ
- युष्मद् अम् (ङेप्रथमयोरम्) अस्मद् अम्
- युव अद् अम् (युवावौ द्विवचने) आव अद् अम्
- युव अआ अम् (प्रथमायाश्च...) आव अ आ अम्
- युव आ अम् (अतो गुणे) आव आ अम्
- युवा अम् (अकः सवर्णे दीर्घः) आवा अम्
- युवाम् (अमि पूर्वः) आवाम्

- ‘औङि’ इत्येव सुवचम् ।

- भाषायाम् किम्?
- युवं वस्त्राणि ।
- मपर्यन्तस्य युवादेशे सति शेषे लोपः ।

- मपर्यन्तस्य किम्?
- युष्मद्   अम्
- पूर्णस्यैव युवादेशे कृते, अन्त्यस्य आत्वे, अमि पूर्वे रूपं सिध्यतीति प्रश्नः ।
- युव    अम् ('युवावौ द्विवचने')
- युवा    अम् ('प्रथमायाश्च द्विवचने भाषायाम्')
- युवाम्    ('अमि पूर्वः')

- साकच्कस्य मा भूत्, युवकाम् । आवकाम् ।
- युष्मकद्  अम् इति स्थिते मपर्यन्तस्यैव इष्यते आदेशः । तेन रूपे ककारस्यापि श्रवणं सम्भवति ।

- ‘त्वया’ ‘मया’ इत्यत्र ‘त्व्या’ ‘म्या’ इति मा भूत् ।
- युष्मद्   (टा)  आ
- त्व  अद्      आ   (‘त्वमावेकवचने’ - ७.२.९७)
- त्व   अय्    आ    (‘योऽचि’ - ७.२.८९)
- त्वया                              (‘अतो गुणे’ - ६.१.९७)
- अत्र मपर्यन्तस्य इत्यधिकाराभावे, पूर्णस्य शब्दस्य त्व-आदेशे कृते, तदन्त्यस्य अकारस्य यादेशे ‘त्व्या’ इति रूपं स्यात् ।

- युवकाभ्याम्, आवकाभ्याम् इति च न सिध्येत् ।
- ‘युवावौ द्विवचने’ इत्यनेन पूर्णयोः आदेशे कृते अकचः श्रवणं न स्यात् ।

# ३८८. यूयवयौ जसि (७.२.९३)

- पदद्वयम् । यूय-वयौ, जसि ।
- ‘युष्मदस्मदोरनादेशे’ (७.२.८६) इत्यतः ‘युष्मदस्मदोः’ इति अनुवर्तते । ‘मपर्यन्तस्य’ (७.२.९१) इति अधिक्रियते ।
- स्पष्टम् ।

- युष्मद् (जस्) अस् अस्मद् (जस्) अस्
- युष्मद् अम् ('ङेप्रथमयोरम्') अस्मद् अम्
- यूय अद् अम् ('यूयवयौ जसि') वय अद् अम्
- यूयद् अम् ('अतो गुणे') वयद् अम्
- यूय् अम् ('शेषे लोपः') वय् अम्
- यूयम् वयम्

- परमयूयम्, परमवयम् ।
- अतियूयम्, अतिवयम् ।
- आङ्गत्वात् तदन्तविधिः प्रवर्तते, गौणे प्राधान्ये च ।

- इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी इति प्राप्ते,
- यूयद्   अम्
- यूय   अम्  ('शेषे लोपः')
  - अदन्तत्वात् 'जसः शी' (७.१.१७) - अदन्तात् सर्वनाम्नः परस्य औङः शी स्यात् - इति प्राप्नोति ।
  - स च परत्वात्, 'वार्णादाङ्गं बलीयः' (प) इति परिभाषया च 'अमि पूर्वः' (६.१.१०७) इति पूर्वरूपं बाधते ।

- ‘अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्’ (प ९३) इति न भवति ।
- अङ्गाधिकारविहिते कार्ये सति पुनः अङ्गाधिकारविहितं कार्यं न भवति इत्यर्थः ।
- प्रकृते शेषलोपस्य आङ्गस्य प्रवृत्तत्वाद् आङ्गः शीभावो न भवतीति भावः ।